# શ્રી નૃસિંહસ્તુતિઃ

ઉદયરવિસહસ્રદ્યોતિતં રૂક્ષવીક્ષં
પ્રલયજલધિનાદં કલ્પકૃદ્વહ્નિવક્ત્રમ ।
સુરપતિરિપુવક્ષશ્છેદરક્તોક્ષિતાંગં
પ્રણતભયહરં તં નારસિંહં નતોઽસ્મિ ।।)

પ્રલયરવિકરાલાકારરુક્ચક્રવાલં
વિરલયદુરુરોચીરોચિતાશાંતરાલ ।
પ્રતિભયતમકોપાત્યુત્કટોચ્ચાટ્ટહાસિન
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે ।। ૧ ।।

સરસરભસપાદાપાતભારાભિરાવ-
પ્રચકિતચલસપ્તદ્વંદ્વલોકસ્તુતસ્ત્વમ ।
રિપુરુધિરનિષેકેણેવ શોણાંઘ્રિશાલિન
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે ।। ૨ ।।

તવ ઘનઘનઘોષો ઘોરમાઘ્રાય જંઘા-
પરિઘમલઘુમૂરુવ્યાજતેજોગિરિં ચ ।

ઘનવિઘટિતમાગાદ્દૈત્યજંઘાલસંઘો
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૩ ||

કટકિકટકરાજદ્ધાટકાગ્ર્યસ્થલાભા
પ્રકટપટતટિત તે સત્કટિસ્થાડતિપટ્વી |
કટુકકટુકદુષ્ટાટોપદૃષ્ટિપ્રમુષ્ટૌ
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૪ ||

પ્રખરનખરવજ્રોત્ખાતરુક્ષારિવક્ષઃ-
શિખરિશિખરરક્તૈરાક્તસંદોહદેહ |
સુવલિભ શુભકુક્ષે ભદ્રગંભીરનાભે
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૫ ||

સ્ફુરયતિ તવ સાક્ષાત સૈવ નક્ષત્રમાલા
ક્ષપિતદિતિજવક્ષોવ્યાપ્તનક્ષત્રમાર્ગમ |
અરિદરધર જાન્વાસક્તહસ્તદ્વયાહો
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૬ ||

કટુવિકટસટૌઘોદ્ઘટ્ટનાદ્ભ્રષ્ટભૂયો

ઘનપટલવિશાલાકાશલબ્ધાવકાશમ |
કરપરિઘવિમર્દપ્રોદ્યમં ધ્યાયતસ્તે
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૭ ||

હઠલુઠદલઘિષ્ઠોત્કંઠ દષ્ટોષ્ઠ વિદ્યુત્સટ
શઠકઠિનોરઃપીઠભિત સુષ્ઠુ નિષ્ઠામ |
પઠતિ નુ તવ કંઠાધિષ્ઠઘોરાંત્રમાલા
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૮ ||

હૃતબહુમિહિરાભાસહ્યસંહારરંહો-
હુતવહબહુહેતિહ્રેપિકાનંતહેતિ |
અહિતવિહિતમોહં સંવહન સૈંહમાસ્યં
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૯ ||

ગુરુગુરુગિરિરાજત્કંદરાંતર્ગતે વા
દિનમણિમણિશૃંગે વાંતવહ્નિપ્રદીપ્તે |
દધદતિકટુદંષ્ટ્રે ભીષણોજ્જિહ્વવક્ત્રે
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૦ ||

અધરિતવિબુધાબ્ધિધ્યાનધૈર્યં વિદીધ્ય-
દ્વિવિધવિબુધધીશ્રદ્ધાપિતેંદ્રારિનાશમ |
વિદધદતિકટાહોદ્ઘટ્ટનેદ્ધાટ્ટહાસં
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૧ ||

ત્રિભુવનતૃણમાત્રત્રાણતૃષ્ણં તુ નેત્ર-
ત્રયમતિલઘિતાર્ચિર્વિષ્ટપાવિષ્ટપાદમ |
નવતરરવિતામ્રં ધારયન રૂક્ષવીક્ષં
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૨ ||

ભ્રમદભિભવભૂભૃદ્ભૂરિ ભૂભારસદ્ભિ-
દ્ભિદનવવિભવભ્રૂવિભ્રમાદભ્રશુભ્ર |
ઋભુભવભયભેત્તર્ભાસિ ભો ભો વિભોઽભી-
ર્દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૩ ||

શ્રવણખચિતચંચત્કુંડલોચ્ચંડગંડ-
ભ્રુકુટિકટુલલાટ શ્રેષ્ઠનાસારુણોષ્ઠ |
વરદ સુરદ રાજત્કેસરોત્સારિતારે
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૪ ||

પ્રવિકચકચરાજદ્રત્નકોટીરશાલિન
ગલગતગલદુસ્રોદારરત્નાંગદાઢ્ય |
કનકકટકકાંચીસિંજિનીમુદ્રિકાવન
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૫ ||

અરિદરમસિખેટૌ બાણચાપે ગદાં
સન્મુસલમપિ કરાભ્યામંકુશં પાશવર્યમ |
કરયુગલધૃતાંત્રસ્રગ્વિભિન્નારિવક્ષો
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૬ ||

ચટ ચટ ચટ દૂરં મોહય ભ્રામયારીન
કડિ કડિ કડિ કાયં જ્વારય સ્ફોટયસ્વ |
જહિ જહિ જહિ વેગં શાત્રવં સાનુબંધં
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૭ ||

વિધિભવવિબુધેશભ્રામકાગ્નિસ્ફુલિંગ-
પ્રસવિવિકટદંષ્ટ્રોજ્જિહ્વવક્ત્રત્રિનેત્ર |
કલ કલ કલ કામં પાહિ માં તે સુભક્તં

www.yousigma.com

દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૮ ||

કુરુ કુરુ કરુણાં તાં સાંકુરાં દૈત્યપોતે
દિશ દિશ વિશદાં મે શાશ્વતીં દેવ દૃષ્ટિમ |
જય જય જયમૂર્તેઽનાર્ત જેતવ્યપક્ષં
દહ દહ નરસિંહાસહ્યવીર્યાહિતં મે || ૧૯ ||

સ્તુતિરિયમહિતઘ્ની સેવિતા નારસિંહી
તનુરિવ પરિશાંતા માલિની સાઽભિતોઽલમ |
તદખિલગુરુમાગ્ર્યશ્રીદરૂપા લસદ્ભિઃ
સુનિયમનયકૃત્યૈઃ સદ્ગુણૈર્નિત્યયુક્તા || ૨૦ ||

લિકુચતિલકસૂનુઃ સદ્ધિતાર્થાનુસારી
નરહરિનુતિમેતાં શત્રુસંહારહેતુમ |
અકૃત સકલપાપધ્વંસિનીં યઃ પઠેત તાં
વ્રજતિ નૃહરિલોકં કામલોભાદ્યસક્તઃ || ૨૧ ||

|| ઇતિ કવિકુલતિલકશ્રીત્રિવિક્રમપંડિતાચાર્યવિરચિતા
શ્રીનૃસિંહસ્તુતિઃ ||

www.yousigma.com